॥ અથ ઋષભસૂક્તમ ॥

ઋષભં મા સમાનાનાં સપત્નાનાં વિષાસહિમ । હંતારં શત્રૂણાં કૃધિ વિરાજં ગોપતિં ગવામ ॥ ૧ ॥

અહમસ્મિ સપત્નહેંદ્ર ઈવારિષ્ટો અક્ષતઃ । અધઃ સપત્ના મે પદોરિમે સર્વે અભિષ્ઠિતાઃ ॥ ૨ ॥

અત્રૈવ વોપિ નહ્યામ્યુભે આર્ત્ની ઈવજ્યયા । વાચસ્પતે નિ ષેધેમાન યથા મદધરં વદાન્ન ॥ ૩ ॥

અભિભૂરહમાગમં વિશ્વકર્મેણ ધામ્ના । આ વશ્ચિત્તમાવો વ્રતમા વોહં સમિતિં દદે ॥ ૪ ॥

યોગક્ષેમં વ આદાયાહં ભૂયાસમુત્તમ આ વો મૂર્ધાનમક્રમીમ । અધસ્પદાન્મ ઉદ્વદત મંડૂકા ઈવોદકાન્મંડૂકા ઉદકાદિવ ॥ ૫ ॥

॥ ઈતિ ઋષભસૂક્તમ સંપૂર્ણમ ॥